# एककम् - २



# आरोग्यं सर्वसाधनम् ।

मानवजीवने धर्मसाधनाय अरोगं शरीरम् अत्यन्तमपेक्षितम्। आरोग्यसंरक्षणाय भारते प्रचाल्यमानाः अनेकाः पद्धतयः सन्ति। तासां परिचायनपरः उपन्यासः तथा आरोग्यसंबन्धीनि सुभाषितानि च अस्मिन् एकके परामृष्टानि।



# ३. लोकहिताय ।

आरोग्यसंरक्षणविषये आयुर्वेदयोगविद्ये प्राधान्यमर्हतः। चरक-सुश्रुत - भेलादिभिः आचार्यैः सम्पुष्टीकृतः भवति आयुर्वेदः। द्वितीयस्य योगस्य शास्त्ररूपेण अवतारणम् मुनिवरेण पतञ्जलिना कृतम्। अतः अस्य उपज्ञाता इति सः प्रसिद्धः अभवत्। तेन तद्दर्शनं पातञ्जलमित्युच्यते।

योगशास्त्रं चित्तवृत्तिनिरोधरूपम्। जीवनाय अनामयं शरीरं स्वस्थं मनः च आवश्यकम्। एतदर्थं योगशास्त्रमुपकारकं भवति। यमः नियमः आसनं, प्राणायामः, प्रत्याहारः, धारणा, ध्यानं, समाधिः इति योगस्य अष्टाङ्गानि। तेषु आसनस्य लक्षणमुक्तं -

"सुखदमनुकूलं च यत् तदासनम्" इति।

लोके चतुरशीतिलक्षम् आसनानि सन्ति। घेरण्डसंहितायां प्राधान्येन द्वात्रिंशद् आसनानि परामृष्टानि। सिद्ध-भद्र-पद्म-मुक्तादीनि तानि मर्त्यलोकस्य आयुरारोग्यसंवर्धनाय अत्यन्तमुपकारकाणि भवन्ति।

योगमाचरतः मनुष्यस्य शुद्धिः आवश्यकी। मनःशुद्धिः, वाक्शुद्धिः, कर्मशुद्धिः, शरीरशुद्धिः, परिसरशुद्धिः,आहारशुद्धिः चैताः षड् शुद्धयः प्राधान्यमर्हन्ति।

सर्वेषां ललितया रीत्या कर्तुं शक्यानि द्वित्राणि आसनानि अत्र दत्तानि।



## 1. ऊर्ध्वहस्तासनम्



### प्रयोजनानि

कशेरुकायाः पृष्ठपेशीनां च प्रयोजनकरम्। वक्रीभूतानि स्कन्धास्थीनि ऋजुतां प्राप्नुवन्ति। पृष्ठवेदनायाः कशेरुकापीडायाश्च शान्तिः लभ्यते। कुक्षिपेशीनां शक्तिः वर्धते। श्वासकोशस्य सङ्कोचविकासौ यथाविधि प्रचलतः च।

## 2. अर्धकटिचक्रासनम्।



### प्रयोजनानि

आसनस्यास्य परिशीलनेन श्रोणीभागस्थदुर्मेदो नश्यति। दहनशक्तिः वर्धते। उदरस्थानामवयवानामारोग्यं प्रवर्धते। कशेरुकानुबन्धिनीनां पेशीनां रक्तवाहिनीनां च दृढता लभ्यते।



3. **वृक्षासनम्।**



**प्रयोजनानि**

एतस्य परिशीलनेन एकाग्रता लभ्यते। आत्मविश्वासः प्रवर्धते। पादौ सबलौ भवतश्च।

परमसुखप्रदायिनी योगविद्या सर्वजीविनः मातेव रक्षति। योगाचार्यस्य निर्देशाननुसृत्यैव योगासनानि परिशील-नीयानि।

**पदच्छेदः।**

| | | |
|---|---|---|
| अत्यन्तमुपकारकाणि | - | अत्यन्तम् + उपकारकाणि |
| अनुसृत्यैव | - | अनुसृत्य + एव |
| आसनस्यास्य | - | आसनस्य + अस्य |
| चैताः | - | च + एताः |
| तास्वन्यतमा | - | तासु + अन्यतमा |
| दुर्मेदो नश्यति | - | दुर्मेदः + नश्यति |
| पीडायाश्च | - | पीडायाः + च |
| पूर्वमेव | - | पूर्वम् + एव |
| प्राधान्यमर्हन्ति | - | प्राधान्यम् + अर्हन्ति |
| भवतश्च | - | भवतः + च |
| मातेव | - | माता + इव |
| योगमाचरतः | - | योगम् + आचरतः |



**विग्रहाः।**

| | |
|---|---|
| आयुर्वेदः | आयुषः वेदः। |
| मुनिवरः | मुनिषु वरः। |
| अनामयम् | न विद्यते आमयः यस्य तत्। |
| सुखदं | सुखं ददाति इति। |
| सङ्कोचविकासौ | सङ्कोचश्च विकासश्च। |

## पठनप्रवर्तनानि।

❖ दुर्मेदोबाधितस्य बालस्य दुर्मेदःपरिहाराय अनुष्ठेयस्य आसनस्य विषये योगाचार्येण सह प्रवृत्तं सम्भाषणं संभाव्य लिखतु।

**श्रद्धेयाः अंशाः।**

- उचितभाषाप्रयोगः।
- विषयावबोधः।
- प्रश्नवाचकशब्दानाम् उपयोगः।

❖ कञ्चिद्योगाचार्यमुपगम्य / योगशास्त्रप्रतिपादकान् ग्रन्थान् पठित्वा योगासनानां वैविध्यं ज्ञात्वा अधो दत्तानां चतुर्णां प्रयोजनानि लिखतु।

## • सर्वाङ्गासनम्।





- पश्चिमोत्तानासनम्।



- भुजङ्गासनम्।



- शवासनम्।



**श्रद्धेयाः अंशाः।**

- आचार्यस्य / ग्रन्थस्य नाम।
- उचितभाषाप्रयोगः।
- विषयक्रमीकरणम्।



# ४. तस्माद् व्यायाममाचरेत् ।

आरोग्यसंरक्षणस्य प्राधान्यं भारतीयाः पूर्वमेव ज्ञातवन्तः। सुभाषितरूपेण प्रचलितेषु तेषु उद्‌बोधनेषु कानिचन अधः दीयन्ते।

**रोगशोकपरीतापबन्धनव्यसनानि च।**
**आत्मापराधवृक्षाणां फलान्येतानि देहिनाम्।।१।।** (सुभाषितसाहस्री)

**अन्वयः** देहिनां रोगशोकपरीतापबन्धनव्यसनानि (इति) एतानि च आत्मापराधवृक्षाणां फलानि (भवन्ति)।

**पदच्छेदः।**

फलान्येतानि - फलानि + एतानि

**पदार्थाः।**

| | | |
|---|---|---|
| देहिनां | - | मनुष्याणाम् |
| रोगशोकपरीतापबन्धनव्यसनानि | - | आमयः, दुःखं, परितापः, बन्धनं, अत्यासक्तिः (च) |
| एतानि | - | इमानि |
| आत्मापराधवृक्षाणां | - | स्वैः कृतानाम् अपराधरूपाणां वृक्षाणाम् |
| फलानि | - | फलानि (भवन्ति)। |

**आशयः** मानवैः स्वयंकृतानर्थानां फलान्येव रोगसन्तापादिक्लेशाः।



**विग्रहाः।**

देही देहः अस्य अस्तीति।

रोगशोकपरीतापबन्धनव्यसनानि रोगश्च शोकश्च परीतापश्च बन्धनञ्च व्यसनञ्च।

आत्मापराधवृक्षाणां आत्मनः अपराधाः आत्मापराधाः। त एव वृक्षाः तेषाम्।

**जीर्णे हितं मितं चाद्यात्**
**न वेगानीरयेद् बलात्।**
**न वेगितोऽन्यकार्यः स्यात्**
**नाजित्वा साध्यमामयम्।।२।।** (अष्टाङ्गहृदयम्)

**पदच्छेदः।**

| | | |
|---|---|---|
| चाद्यात् | - | च + अद्यात् |
| वेगितोऽन्यकार्यः | - | वेगितः + अन्यकार्यः |
| नाजित्वा | - | न + अजित्वा |

**अन्वयः** जीर्णे हितं मितं च अद्यात्। बलाद् वेगान् न ईरयेत्। वेगितः (पुरुषः) अन्यकार्यः न स्यात्। आमयम् अजित्वा (किमपि) न साध्यम्।

**पदार्थाः।**

| | | |
|---|---|---|
| जीर्णे | - | भुक्ते जीर्णे |
| हितं | - | श्रेयस्करं |
| मितं च | - | आवश्यकं च |
| अद्यात् | - | भक्षयेत् |
| बलात् | - | बलात्कारेण |
| वेगान् | - | मूत्रपुरीषादीन् |
| न ईरयेत् | - | न निरोधयेत्, न प्रेरयेत् च |
| वेगितः | - | सञ्जातवेगः (मूत्रपुरीषविसर्जनेच्छुः) |



| | | |
|---|---|---|
| अन्यकार्यः | - | कार्यान्तरव्यापृतः |
| न स्यात् | - | न भवेत् |
| आमयः | - | रोगः |
| अजित्वा | - | न जित्वा (रोगजयं विना) |
| न साध्यम् | - | न किमपि शक्यम्। |

**आशयः** भुक्तस्य अन्नस्य पचनानन्तरमेव पुनः भोजनं कार्यम्। मूत्रपुरीषयोर्विसर्जनं बलात् निरुध्य कार्यान्तरव्यापृतो न भवेत्। रुग्णेन औषधादिभिः रोगशमनाय यत्नः कार्यः। रोगशमन एव कर्मकरणसामर्थ्यम्।

**विग्रहाः।**

| | |
|---|---|
| अन्यकार्यः | अन्यत् कार्यं यस्य, सः। |
| वेगितः | वेगाःसञ्जाता अस्य। |

**शीतोष्णौ चैव वायुश्च त्रयः शरीरजाः गुणाः।**
**तेषां गुणानां साम्यं यत्तदाहुः स्वास्थ्यलक्षणम्।।३।।**

(वैद्यकीयसुभाषितानि)

**पदच्छेदः।**

| | | |
|---|---|---|
| चैव | - | च + एव |
| वायुश्च | - | वायुः + च |

**अन्वयः** शीतोष्णौ च वायुः च शरीरजाः त्रयः गुणाः एव। तेषां गुणानां यत् साम्यं तत् स्वास्थ्यलक्षणम् आहुः।

**पदार्थाः।**

| | | |
|---|---|---|
| शीतोष्णौ | - | शीतश्च उष्णश्च (पित्तकफौ) |
| वायुः च | - | वातः च |
| शरीरजाः | - | शरीरे जाताः |
| त्रयः गुणाः एव | - | त्रयः गुणाः भवन्ति |



| | | |
|---|---|---|
| गुणानां साम्यं | - | (त्रयाणां) गुणानां समत्वम् (इति यत्) |
| तत् स्वास्थ्यलक्षणं | - | तत् आरोग्यलक्षणम् |
| आहुः | - | वदन्ति। |

**आशयः** यस्य शरीरे शीतोष्णवायवः (वातपित्तकफाः) गुणाः समत्वं भजन्ते सः स्वस्थः भवति। तेषां विषमावस्थायां रोगः च।

**विग्रहाः।**

| | |
|---|---|
| शीतोष्णौ | शीतश्चोष्णश्च। |
| स्वास्थ्यम् | स्वस्मिन् तिष्ठतीति स्वस्थः, तस्य भावः। |

**दीपो भक्षयते ध्वान्तं कज्जलं च प्रसूयते।**
**यदन्नं भक्षयेन्नित्यं जायते तादृशी प्रजा।।४।।**

(सुभाषितरत्नाकरम्)

**पदच्छेदः।**

| | | |
|---|---|---|
| दीपो भक्षयते | - | दीपः + भक्षयते |
| भक्षयेन्नित्यं | - | भक्षयेत् + नित्यं |

**अन्वयः** दीपः ध्वान्तं भक्षयते, कज्जलं प्रसूयते च। नित्यं यद् अन्नं भक्षयेत् तादृशी प्रजा जायते।

**पदार्थाः।**

| | | |
|---|---|---|
| दीपः | - | प्रदीपः |
| ध्वान्तम् | - | तमः |
| भक्षयते | - | आहरति |
| कज्जलम् | - | अञ्जनम् |
| प्रसूयते च | - | जनयति च |
| नित्यम् | - | सदा |
| यद् अन्नम् | - | यद् भोज्यम् |
| भक्षयेत् | - | भुञ्जीत |



| | | |
|---|---|---|
| तादृशी | - | तदनुसारिणी |
| प्रजा | - | सन्ततिः |
| जायते | - | जनिं प्राप्नोति। |

**आशयः** दीपः अन्धकारं भुक्त्वा अञ्जनं प्रसूयते। यः यादृशम् आहारं भुङ्क्ते तस्य तादृशी प्रजा जायते।

**व्यायामपुष्टगात्रस्य बुद्धिस्तेजो यशो बलम्।**
**प्रवर्धन्ते मनुष्यस्य तस्माद् व्यायाममाचरेत्।।५।।**

(सुभाषितरत्नाकरम्)

**पदच्छेदः।**

| | | |
|---|---|---|
| बुद्धिस्तेजो यशो बलम् | - | बुद्धिः + तेजः + यशः + बलम् |
| व्यायाममाचरेत् | - | व्यायामम् + आचरेत्। |

**अन्वयः** व्यायामपुष्टगात्रस्य मनुष्यस्य बुद्धिः, तेजः, यशः, बलं च प्रवर्धन्ते। तस्माद् व्यायामम् आचरेत्।

**पदार्थाः।**

| | | |
|---|---|---|
| व्यायामपुष्टगात्रस्य | - | व्यायामेन यस्य शरीरं पुष्टिं प्राप्तं, तस्य |
| मनुष्यस्य | - | नरस्य |
| बुद्धिः | - | मतिः |
| तेजः | - | शोभा |
| यशः | - | कीर्तिः |
| बलं च | - | शक्तिः च |
| प्रवर्धन्ते | - | उपचिन्वन्ति |
| तस्माद् | - | अतः |
| व्यायाममाचरेत् | - | व्यायामं कुर्यात्। |

**आशयः** व्यायामेन शरीरस्य पुष्टिः जायते। व्यायाममाचरतः बुद्ध्यादिकं प्रवर्धते। अतः व्यायामं कुर्यात्।



## पठनप्रवर्तनानि।

❖ सुभाषितानि सतालं आलपतु ।

**श्रद्धेयाः अंशाः।**

- उच्चारणस्फुटता।
- उचितः तालः।
- अर्थावबोधः।

❖ आरोग्यसंरक्षणार्थम् अनुशीलनीयानि कार्याणि स्वमतानुसारं संक्षिप्य लिखतु।

**श्रद्धेयाः अंशाः।**

- उचितभाषाप्रयोगः।
- आशयापग्रथनपटुता।

❖ युष्माकं प्रदेशे प्रवर्त्यमाने लोकारोग्यदिनाचरणे अवतारणीयं प्रभाषणं सज्जीकरोतु, अवतारयतु च।

**श्रद्धेयाः अंशाः।**

- उचितभाषाप्रयोगः।
- आशयानां क्रोडीकरणम्।

## अनुबन्धः।

**शब्दकोशः।**

| | | | |
|---|---|---|---|
| अञ्जलिः | अञ्जलिः | കൂപ്പുകൈ | folded hands |
| अद्यात् | भक्षयेत् | ഭക്ഷിക്കണം | must eat |
| अनामयः | अरोगः | രോഗമില്ലാത്ത | without any disease/healthy |
| आहुः | ब्रुवन्ति | പറയുന്നു | says |
| इतरः | अन्यः | മറ്റൊരു | another |
| ईरयेत् | निरोधयेत्, प्रेरयेत् | തടയണം/പ്രേരിപ്പിക്കണം | -to be prevented/impelled |
| उपज्ञाता | प्रथमबोधकः | ആവിഷ്കർത്താവ് | founder |
| ऋजुता | अवक्रता | നിവർന്ന് | straight |



| | | | |
|---|---|---|---|
| कज्जलं | अञ्जनं | കരി | black |
| कशेरुका | कशेरुः | നട്ടെല്ല് | back born |
| कुक्षिः | उदरं | വയർ | stomach |
| गात्रं | शरीरं | ശരീരം | body |
| चित्तं | मनः | മനസ്സ് | mind |
| तेजः | शोभा | തേജസ്സ് | lusture |
| ध्वान्तः | अन्धकारः | ഇരുട്ട് | darkness |
| नित्यं | सदा | എപ്പോഴും | always |
| पेशी | पेशी | പേശി | muscle |
| प्रजा | सन्ततिः | സന്താനം | offspring |
| प्रथितं | प्रसिद्धं | പ്രശസ്തം | famous |
| प्रवरः | श्रेष्ठः | ശ്രേഷ്ഠൻ | great |
| प्रसूयते | जनयति | പ്രസവിക്കുന്നു | delivers |
| बलं | शक्तिः | ശക്തി | strength |
| बहवः | अनेके | ധാരാളം | plenty |
| बुद्धिः | मतिः | ബുദ്ധി | intelligence |
| मर्त्यलोकः | मानवसमूहः | മനുഷ്യസമൂഹം | human society |
| यशः | कीर्तिः | കീർത്തി | fame |
| रोगः | आमयः | രോഗം | illness |
| वेगाः | विसर्ज्याः | വിസർജ്യങ്ങൾ | excretions |
| व्यसनं | अत्यासक्तिः | ആസക്തി | passion |
| शोकः | दुःखम् | സങ്കടം | sadness |
| श्रोणी | नितम्बः | അരക്കെട്ട് | waist |
| साम्यं | समत्वं | തുല്യത | equality |
| सुखदं | सुखदायकं | സുഖം നൽകുന്നത് | pleasing |
| स्वास्थ्यं | स्वस्थता | സ്വസ്ഥത | comfortable state of the body and the mind/ comfortability |



## अव्ययानां प्रयोगपरिचयः।

जित्वा - (जि धातोः क्त्वान्तं रूपम्।) त्वं जित्वा वा भोक्ष्यसे महीम्।

पुनः पुनः - शिशुः पिपासया पुनः पुनः रोदिति।

## अमरकोशः।

शरीरम् - गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः।
रोगः - रुग् रुजाचोपतापरोगव्याधिगदामयाः।

वृक्षः - वृक्षो महीरुहः शाखी विटपी पादपस्तरुः।
सुखं - स्यादानन्दथुरानन्दशर्मशातसुखानि च।

मनुष्यः - मनुष्या मानुषा मर्त्या मनुजा मानवा नराः।

मुनिः - मुनिर्वराटकः स्वातिर्वर्णको झाटलिर्मनुः।

बुद्धिः - बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः।

## शब्दरूपाणि।

सकारान्तः नुपंसकलिङ्गः 'मनस्' शब्दः।

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मनः | मनसी | मनांसि |
| सं प्रथमा | हे मनः | हे मनसी | हे मनांसि |
| द्वितीया | मनः | मनसी | मनांसि |
| तृतीया | मनसा | मनोभ्यां | मनोभिः |
| चतुर्थी | मनसे | मनोभ्यां | मनोभ्यः |
| पञ्चमी | मनसः | मनोभ्यां | मनोभ्यः |
| षष्ठी | मनसः | मनसोः | मनसाम् |
| सप्तमी | मनसि | मनसोः | मनस्सु। |

## धातुरूपाणि।

विद्यते - विद् सत्तायां धातुः आ. प. लट्.प्र.पु.ए.व.

| पुरुषः | एकवचनं | द्विवचनं | बहुवचनम् |
|---|---|---|---|
| प्र. पु. | विद्यते | विद्येते | विद्यन्ते |
| म. पु. | विद्यसे | विद्येथे | विद्यध्वे |
| उ. पु. | विद्ये | विद्यावहे | विद्यामहे। |

प्रसूयते - प्र + षूङ् - प्राणिप्रसवे धातुः दिवादि- आ.प..लट्.प्र.पु.ए.व.

| | | | |
|---|---|---|---|
| प्र. पु. | प्रसूयते | प्रसूयेते | प्रसूयन्ते |
| म. पु. | प्रसूयसे | प्रसूयेथे | प्रसूयध्वे |
| उ. पु. | प्रसूये | प्रसूयावहे | प्रसूयामहे। |

## अधिकवाचनांशः।

### घेरण्डसंहिता - द्वितीयोपदेशम्।

(घेरण्डः -आचार्यस्य नाम)

सिद्धं भद्रं तथा पद्मं
मुक्तं वज्रं च स्वस्तिकं
सिंहं च गोमुखं वीरं
धनुरासनमेव च।। (श्लोकः - ३)

मृतं गुप्तं तथा मात्स्यं
मत्स्येन्द्रासनमेव च।
गोरक्षं पश्चिमोत्तानम्
उत्कटं संकटं तथा।। (श्लोकः - ४)

मयूरं कुक्कुटं कूर्मं
तथा चोत्तानकूर्मकम्।
उत्तानमण्डूकं वृक्षं
मण्डूकं गरुडं वृषम्।। (श्लोकः - ५)

शलभं मकरं चोष्ट्रम्
भुजङ्गं योगमासनम्।
द्वात्रिंशदासनानां तु
मर्त्यलोके हि सिद्धिदा।। (श्लोकः - ६)

(1. सिद्धं, 2. भद्रम्, 3. पद्मं, 4. मुक्तं, 5. वज्रं, 6. स्वस्तिकं, 7. सिंहं, 8. गोमुखं, 9. वीरं, 10. धनुः, 11. मृतं, 12. गुप्तं, 13. मत्स्यं, 14. मत्स्येन्द्रम्, 15. गोरक्षं, 16. पश्चिमोत्तानं, 17. उत्कटं, 18. संकटं, 19. मयूरं, 20. कुक्कुटम्, 21. कूर्मं, 22. उत्तानकूर्मकं, 23. उत्तानमण्डूकं, 24. वृक्षम्, 25. मण्डूकं, 26. गरुडम्, 27. वृषम्, 28. शलभं, 29. मकरं, 30. उष्ट्रम्, 31. भुजङ्गम्, 32. योगम्।)





# किमधिगतम् ?

## बालस्य योगाचार्यस्य च मिथः

### भाषणरचना

| | स्वयं साधु कृतम् | सुहृदः साहाय्येन कृतम् | परिष्करणीयं वर्तते |
|---|---|---|---|
| पाठ्यांशस्य आशयाः सञ्चिताः | | | |
| उचित संबोधनरूपाणि प्रयुक्तानि | | | |
| प्रश्नवाचकशब्दानां वैविध्यं स्वीकृतम् | | | |
| संभाषणस्य औचित्यम् | | | |

### योगासनानां विवरणलेखनम्

| | | | |
|---|---|---|---|
| आचार्येण सह अभिमुखं सम्पादितम् | | | |
| पाठ्यांशाः ससूक्ष्मं पठिताः | | | |
| आशयस्य व्यक्तता | | | |
| आशयानां क्रमीकरणम् | | | |

### प्रभाषणरचना अवतारणं च

| | | | |
|---|---|---|---|
| पाठ्यांशाद् आशयः स्वीकृतः | | | |
| आशयानां क्रमीकरणम् | | | |
| सभाकम्पं विना अवतारणम् | | | |